भूयास्त्वयिभूमिरितिवैवयंकामंकामयतेसोस्मैकामस॰क्॥वाएतांपंचदेवताएतेनका
म्येनयज्ञेनायजतयत्कामाअयजंतसमृध्यंआभ्यःकामःसमृध्यतयत्कामोहवाएतेनय
जतेसोस्मैकामःसमृध्यते॥सर्वेषांवाऽए॥५॥एषवैप्रतिष्ठा॰नि॥६॥इतिनमस्का

रा॥कंन्यातैलारोपनमंत्राः॥त्वंचैतद्यस्यियदहंत्येवमाकुरूमासुयाभुमतिसमर्वेन
मेधीतितथेतितेदेधाचमिनतस्यत्सोभ्यन्यतमासतेचेदमसेचकराथयदस्मासूर्य
मासतेनमाःप्रजाउदरेणावितस्मादकुर्दृत्रएवतैद्यंनादऽसीहत्रएनग्नतीदयंहिय
दसावापूर्यतस्मादेवंलोकाद्याप्यायतेथयदिमाःप्रजाअन्नमिछतेस्माएवेतद्वृत्रायोद
रायवलीयंहरतिसयोहैवमेवाद्वृत्रमन्नादंवेदान्नादोहैवभवति॥१॥प्रजापतिर्हवाइदम
ग्रएकएवाससएक्षतकथनुप्रजायेतिसोश्राम्यछपोतप्यतसोग्निमेवमुखाज्जनयांचक्रेतप्य
देवंमुखादजनयतस्मादन्नादोग्निःसयोहैवमेतमग्निमन्नादंवेदान्नादोहैवभवति॥२॥
तद्यत्सारस्वतमनुभवतिवाग्वैसरस्वत्यन्नमेवसोमःतस्माद्योवाचाप्रसाम्यंनादोहैवभव
ति॥३॥एएवांनादःप्रासोहिदमन्नमद्यतउदानएवान्नप्रउदानेनहीदमन्नंप्रदीयत
सयोहैतावेन्नादंचान्नप्रदंचदर्शपूर्णमासावेदान्नादोहैवभवति॥४॥सर्वेषावाएषवेदा॰
चति॥५॥एषवैप्रतिष्ठानाम॰भवति॥६॥इतिनमस्काराः॥कृतस्यतैलारोपणाख्यस्य
कर्मणःसागतासिभ्यर्थंयथाशक्त्याब्राह्मणान्भोजयिष्ये॥नानागोत्रेभ्योब्राह्मणेभ्यः
भूयसीदक्षिणादास्येतेनश्रीकर्मांगदेवताःप्रियंतां॥इतितैलारोपणं॥

॥

अथविवाह॥ ॥अथसीमंतपूजनं॥ ततोदीपगंधास्तपुष्पमालावस्त्राणि नारीकेरफलं
६९ चारायनूर्यघोषयुक्तःपुरंद्रिभिःब्राह्मणैःसहपरंगत्वाप्रशस्तालंकृतेवस्त्राद्यास्तादितपीठे
प्राङ्मुखंवरंउपविश्य॥स्वयंतत्प्राच्याप्रत्यङ्मुखंउपवेश्य॥ॐमुखश्चेत्यादिका॰देशकालौ॰
तिथौ॥करिष्यकन्याविवाहांगभूतंआगत्यवरंसीमंतिकेणार्चयिष्ये॥तत्रादौनिर्विघ्नार्थं
महागणपतिपूजनंकरिष्ये॥महागणाधिपतयेनमः॥पंचोपचारैःपूजयेत्॥अनयापूजया
गणेशःप्रीयेतां॥अथवरुणपूजनं॥वरुणायनमःपंचोपचारैःपूजयेत्॥अनयापूजयावरु
णःप्रीयेतां॥तदंगब्राह्मणपूजनंकरिष्ये॥वस्त्रादिभिःपूजयेत्॥अथवरपूजनं॥पाद्य
वस्त्रैर्यथाविभवंसंपूज्य॥पादार्थंमुदकं॥३॥विराजोदोहइतिपादप्रक्षालनं॥विराजो
दोहोसिविराजोदोहमशीयमपिपाद्यायैविराजोदोहः॥प्रतिगृह्यतां॥प्रतिगृह्णामि॥
अनेनैववामं॥अथगंधं॥ॐसुचक्षाअहमक्षिभ्यांभूयासंसुवर्चामुखेन॥ॐभृत्कर्णा
भ्यांभूयासंमू॥इतिलेपनं॥अनाधृष्टाइत्येनेनमंत्रेणअक्षतारोपणं॥अनाधृष्टपुरस्ता॰
सि॥१॥वस्त्रसर्पणं॥आप्लावेनशिरोवेष्टयेत्॥युवासुवासाः॰परिवीतआगात्॥इतिमंत्रेण
शिरोवेष्टं पूजयेत्॥ततोशिष्टावीरान्॥नागवल्लीदलेनवसोःपवित्रमसितिमंत्रेणवरमस्तकेन ६९
नेलाशेषणं॥कार्यं॥ततोऋतवस्थइतिमंत्रेणवरहस्तेश्रीफलंदद्यात्॥तत्रमंत्राः॥ऋत

ऋतवस्थऋतद्रुधऋतुष्टाऋतावृधाः॥घृतश्चुतोमधुश्चुतोविराजोनामकामधुघाअक्षीयमा
णाः॥ऋतवस्थेत्यसावाह्येताऽऋतावृधऽइतिसत्यवृधइत्येतदृतुष्टास्थऋतावृधइत्येहोरा
त्राणिवाइष्टकाऽऋतुषुवाऽअहोरात्राणिसिष्टतिघृतश्चुतोमधुश्चुतऽइतितदेनाघृतश्चुत
मधुश्चुतश्चकुरुतेति॥३॥विराजोनामेत्येतदेवाएताइष्टकानामिरूपाख्येत॥यथायथैना
ऽअंतरा चक्षतेताऽएनानभ्युपावर्त्तनाथलोकंपृणाऽएवपराञ्चस्कुरहितनाभ्योनि
मेमिहत्यस्तावैराजोनामकुर्वंतताऽएनानभ्युपावर्त्तनतस्मादृशादृष्टकाउपदधाय
लोकंपृणयामिमंत्रयतेतदेनाविराजंकुरुतेदशाक्षरा हिविराड्यामधुघाअक्षयिन्ना
णाःकुरुते॥३॥अनेनमंत्रेणवरहस्तेश्रीफलंदेयं॥याःफलिनिर्यो॰मः॥६॥कृतस्यासी
मंतपूजनाख्यस्यकर्मणःयथाशक्त्याश्रीं॰ध्ये॥नानानाम॰तेनश्रीकर्मांगदेवताःप्रियंतां॥
ततोगणपतिकलशविसर्जनं॥योनुदेवत्व॥ततोवरःइष्टदेवतापित्रादिभ्यनमस्कृत्य
तैनुमोदितोयथाविभवंअश्वादियानमारुह्यब्राह्मणैःज्ञातिबांधवैश्चपुरंध्रिभिःपूर्ण
कलशपुष्पमालाक्षतदीपमालाध्वजभोगालिकतूर्यघोषैश्चसहपूर्णकलशोदकंपा
त्रकन्याश्चकुंभाक्षतसहवधूगृहेगत्वा॥तद्वारदेशेप्राङ्मुखंस्थितोनिराजयूर्ण

कुंभमुत्तेपुरश्चिजनैःप्रत्युद्गतोनिराजितोतगृहंप्रविशेत्॥इतिसीमंतपूजनं॥ ॥अ
७७ थफलदानं॥ततोवरपितापफलैर्वधूपूजयेत्॥तत्रप्रयोगः॥सुमुखश्चेत्यादिकाःदेशकाः
तिथौ॥करिष्यमाणवरविवाहांगभूतंफलेकन्यानिरिक्षणं॥करिष्ये॥तत्रादौनिर्विघ्नार्थम
हागणपतिपूजनंकलशपूजनंकरिष्ये॥महागणपतयेनमःपंचोपचारैःपूजयेत्॥अनया
पूजयागणेशःप्रियतां॥ततोगवरुणपूजनं॥वरुणायनमःपंचोपचारैःपूजयेत्॥अनयापूज
यावरुणःप्रियतां॥ततोगब्राह्मणपूजनं॥वस्त्रादिभिःपूजयेत्॥अथवधूपूजनं॥वधुसंप्रदा
यागतमंत्रैःकुंकुमपुष्पैवस्त्राभरणादिभिःसंपूज्य॥कुंकुमसमर्पणं॥ॐसुमंगल्लीरियंव
धूरिमांसमेतंपश्यत॥सौभाग्यमस्यैदत्वायथास्तंविपरेतनेति तां॥१॥अथवस्त्रसम
र्पणं॥कुमार्यावासःपरिधानं॥ॐजरांगछपरिधत्स्वावासोभवाकृत्तिनामभिश्शतंवा
वा॥त्रातेजीवशरदःसुवर्चीरयिंचपुत्राननुसंव्ययस्वायुष्मतीदंपरिधत्स्वावासः॥२॥स्व
र्णधर्मस्वाहाइतिमंत्रेणवधूःसुवर्णंस्पृशेत्॥ॐस्वर्णधर्मस्वाहास्वर्णाकःस्वर्णशुक्रःस्वा
स्वर्णज्योतिःस्वाहास्वर्णसूर्यःस्वाहा॥३॥यांफलिनीरितिफलंपंचफुंगीफलानिनिवेदयेत् ७०
॥ॐयाःफलिनीर्याअफलाः॥४॥शांतिफलानिनिवेदयेत्॥ऋतवस्थइतिमंत्रेणहोऋचं

पठेत्॥ऋतावस्थऋतवःपाः॥१॥ऋतवस्थेत्यृतवोद्येकुरुते॥२॥विराजोनामद्येतकु
रुते॥३॥एभिर्ब्राह्मणैःसहयथाशक्त्यावायनदानानिदद्यात्॥कृतस्यफलदानाख्यस्यक
र्मणःसांगतासिध्यर्थंयथाशक्त्याभूयसिदक्षिणादास्येतेनश्रीकर्मांगदेवताःप्रीयंतां॥
ततोगणपतिकलशविसर्जनं॥यांतुदेवेति॥१॥इतिफलदानं॥ ॥अथम
धुपर्कः॥ ॥तत्रप्रयोगः॥पंचविंशतिभिःकुशैर्घटितंमाक्षुमात्रंविष्टरद्वयं॥पाद्योपाद
प्रक्षालनार्थंजलं॥अर्घार्थंजलंचंदनाक्षतपुष्पाणि॥मधुपर्कार्थंदधिमधुघृतमाद्यं॥
सुमुखश्चेत्यादिकाःदेशकाःशुभपुण्यतिथौ॥कन्यार्थिनिगृहागतंवरंमधुपर्केणार्चयि
ष्ये॥ॐसाधुभवानास्तामर्चयिष्यामोभवंतं॥ॐअर्चय॥इतिवरः॥ॐविष्टरोविष्टरो
विष्टरःप्रतिगृह्यतां॥प्रतिगृह्णामि॥ततोघ्यार्घ्ययुतःसकुशादिष्टरंप्रतिगृह्णाति॥ॐव
र्ष्मास्मिसमानानामुद्यतामिवसूर्यः॥इमंतमभितिष्ठामियोमाकश्चाभिदासति॥१॥
एवमभ्युपविशति॥विष्टरमुदगग्रमासेनेनिधायोपविशति॥पाद्यार्थमुदकंपाद्यार्थ
मुदकंप्रतिगृह्यतां॥प्रतिगृह्णामि॥ब्राह्मणस्यदक्षिणंप्रथमंपादंप्रक्षाल्य॥वामप्रक्षा

प्रक्षालयति।ॐ विराजोदोहोसि विराजोदोहमसियमयिपाद्यायै विराजोदोहः॥१॥अने
नैववामं।ॐपादार्थमुदकंपादार्थमुदकंपादार्थमुदकंप्रतिगृह्यतां॥प्रतिगृण्हामि॥ॐवि
राजोदोहोसि विराजोदोहमसि॥यमपिपाद्यायै विराजोदोहः॥ पूर्ववत द्वितीयोविष्टरः॥
विष्टरोविष्टरोविष्टरःप्रतिगृह्यतां॥प्रतिगृह्णामि॥भूमोधृत्वातस्योपरिपादौकृत्वा॥ॐव
र्ष्मास्मिसमानानामुद्यतामिवसूर्यः॥इमंतमभितिष्ठामियोमाकश्चाभिदासति॥२॥अ
र्घोर्घोघ्रिःप्रतिगृह्यतांप्रतिगृह्णामि॥ॐअपस्त्वुष्माभिःसर्वान्कामानवानिति॥त
तोर्घःसिरसावंद्यप्राणुदस्वानिनयंनमिमेक्षयते॥ॐसमुद्रंवःप्रहिणोमिस्वायोनिमभि
गछत॥अरिष्टास्माकंविरामापरासेचिमत्पयइति॥आचमनीयमुदकमाचमनीयमु
दकमाचमनियंप्रतिगृह्यतां॥प्रतिगृण्हामि॥अर्घार्घःआचमति॥ॐआमागन्यशामा
सꣳसृजवर्चसा॥ तस्मांकुरुप्रियंप्रजानामधिपतिंपशूनामरिष्टिंतनूनां॥ततोहिराच
मनं॥ततोर्घायतुमधुपर्कमाहरते॥दधिमधुघृतंकांशपात्रेकृत्वा॥ॐमधुपर्कोमधु ७१
पर्कोमधुपर्कःप्रतिगृह्यतां॥ततोर्घायतुहस्तस्थितेमधुपर्कमर्घःईक्षते।ॐमित्रस्य

चक्षुषाप्रतीक्षते॥ततःप्रतिगृण्हातीदंवस्यत्वेतिॐदेवस्यत्वा॰मू॥प्रतिगृह्यतां॥प्रति
गृण्हामि॥प्रतिगृह्यसव्येपाणौकृत्वा॥दक्षिणस्यानामिकयामधुपर्कंप्रदक्षिणमालोडय
तिॐनमस्यावास्यायांनद्यांनेयतऽआविद्धंततेनिष्कृतामितिसकृत॥अनामिकांगुष्ठेनच
त्रिर्निष्कृष्यतितस्यत्रिर्बहिः॥एवंत्रिरालोडनं॥३॥ॐनमःस्यां॰ओंमूनमःस्याः॥३॥
त्रिःप्राश्नातिॐयन्मधुनोमध्यंपरमंरूपेनाद्यं॥तेनाहंमधुनोमध्येनपरमेमरू
पेणंनाद्येनपरोमध्योंनादोसानीति॥॥पुनरप्यनेनैववारद्वयंउच्छिष्टमेवप्राश्नाति॥
ॐयन्मधुनोमध्यं॥यन्मधुनोमध्यं॥३॥सर्वंवाप्राश्नीयान्मान्वासंचरेन्नियेदाचम्य
प्राणान्त्समृशतिसकृदाचमनं॥उदकोपस्पर्शः॥ॐवाङ्मऽआस्येस्तु॥मुखंकराग्रेण॥१॥
ॐनसोमेप्राणोस्तु॥तर्जन्ययुष्टाभ्यांयुगपत्॥ॐयक्षणोर्मेचक्षुरस्तु॥अनामिकाभ्यां॥३॥
ॐकर्णोर्मेश्रोत्रमस्तु॥दक्षिणे॥४॥एवंवामे॥ॐबाहोर्मेबलमस्तु॥दक्षिणएवंवामे
ॐऊर्वोर्मेओजस्तु॥हस्तेनयुगपत्॥६॥ॐअरिष्टानिमेंगानितनूस्तन्वामेसहसंतु॥७
ॐसिरःप्रभृतीनिपादांतानिसर्वाण्यंगानिउभाभ्यांहस्ताभ्यांमालभते॥८॥ततोऽर्च

यितागामानीयरशासमादयगो गोर्गोअभ्यनामितिवरंप्रतिवदति॥ॐगोगोर्गोः॥ मा
तारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः॥प्रनुवोचंचिकितुषेजनायमागाम
नागामदितिंवधिष्ट॥मनश्चामुख्यचपाप्माहता॥१॥ॐउत्सजतृणान्यस्मिंतिब्रूयात्॥
ॐउत्सजगवरब्रूयात्॥१॥ॐसुचक्षसाऽहमक्षिभ्यांभूयासंसुवर्चामुखेन॥सुभ्रुक
र्णाभ्यांभूयासंमितिलेपनं॥१॥अत्रवस्त्रपरिधानं॥ॐपरिधास्येयशोधास्येदीर्घायुत्वायज
रदष्टिरस्मि॥१॥तंत्वजीवामिशरदःपुरूचीरायस्पोषमभिसंव्ययिष्ये॥२॥अथयज्ञोपवीत
परिधानं॥ॐयज्ञोपवीतंज्जः॥३॥त्रिराचमनं॥अथोत्तरीयं॥यशसेत्युत्तरियवस्त्रं॥ॐश्रि
यासामाद्यावापृथिवी॥यशसेंद्रायबृहस्पति॥यशोभगश्चमाविदद्यशोमाप्रतिपद्यतां॥पुष्प
मालाग्रहणं॥ॐयाऽअहरज्जमदग्निश्रद्धायैकामायेड्याय॥ताऽअहंप्रतिगृह्णामि॥
यशसाचभगेनच॥८॥यथावद्धृति॥ॐयद्यज्ञोपसरसामिंद्रस्यकारविपुलंपृथु॥जेमसं
जेनसंग्रथितासुमनसऽआबध्नामियज्ञोमइति॥अथालंकारणं॥ॐअलंकरणमसिभूया
लंकरणभूयासमिति॥७॥दक्षिणकरणे॥अनेनेवामेश्रीलक्ष्मीनारायणस्वरूपिणेवरा
य॥धूपंसमर्पयामि॥श्रीलक्ष्मीनारायणस्वरूपिणेवरायदीपंस॥९॥श्रीलक्ष्मीऽर्क

DR BHAU DAJI

दार्कान्नेवेद्यंस०॥१०॥श्रीलक्ष्मीपुगीफलंस०ताबूलंसमर्पयामि॥११॥श्रीलक्ष्मीयथाशक्ति
दक्षिणांस०॥श्रीलक्ष्मीनारायणप्रीयेतां॥अनयापू०लक्ष्मीनारायणःप्रीयेतां॥कृतस्यमधु
पर्काख्यस्यकर्मणःसांगतासिध्यर्थंयथाशक्त्याब्राह्मणान्भूयसीदक्षिणादास्येतेनश्रीक
र्मांगदेवताःप्रीयेतां॥ ॥इतिमधुपर्कः॥ ॥ततोविवाहवेद्यांगत्वा॥ ॥सुमु
खश्चेत्यादिकाल०देशकालौ०शुभपुण्यतिथौ॥धर्मार्थकामप्रजासिध्यर्थंदारापरिग्रहणाङ्गे
नित्यंअस्मिन्नूस्थंडिलेपंचभूःसंस्कारपूर्वकंअथअग्निप्रतिष्ठापनंकरिष्ये॥त्रिभिर्दर्भैःपरिस
मुह्य॥गो०यअ०हुंफट्इतिमंत्रेणकुल्यांदारुमयेकुल्यांपरित्यज्य॥अग्निमुपसमाधाय॥
अथाग्न्यर्च्यानं॥अग्निंप्रज्वालितंवंदेजातवेदंहुताशनं॥हिरण्यवर्णमनलंसमृद्धिंविन्दतोमुखं॥१॥
अग्निमूर्द्धेतिमंत्रस्यकण्वऋषिःगायत्रीछंदःअग्निर्देवताअग्निस्थापनेविनियोगः॥अग्निमूर्द्धो
ति॥१॥लौकिकाग्नेस्थापनं॥विवाहयज्ञकर्तामाग्निंस्थापयामिपूजयामि॥अग्निस्थापनो
त्तरं॥ततोगृहमङ्गत्वा॥प्राङ्मुखीकन्यामवस्थाप्य॥प्रत्यंगमुखोनरःस्थेत्॥अत्रवधुवर
दैवज्ञे योर्मध्यवस्त्रेणांतर्द्धानं॥तत्रैमंगलकर्मतीनांपटनंकुर्यात्॥विशोपकोद्धारणीयाः॥तत्रदैवज्ञे
मुहूर्तेप्रतिष्ठांकुर्यात्॥ॐप्रतिष्ठंतिसर्वेपरनीयं॥ततोवरःप्राङ्मुखःकन्याप्रत्यङ्मुखीचो

पविशतः मनोजूतिरितिप्रतिष्ठा॥ॐमनोजूति॰ष्टा॥१॥ मनोजूति॰स्तुषताम्ज्य
स्येति॰स्ति॥२॥एषवै ब्राह्मणपरेतू॥१३॥सुप्रतिष्ठितावरदाभवेतु॥दृषत्योरविछिं
नाप्रीतिरस्का॥ततोवरः॥कुमार्यःवासःपारधानं॥तत्रमंत्रः॥ॐजरागछंपरिधत्स्व
वासोभवाकृष्टिनामभिशस्तीपावाशतंजीवामिशरदःकवच्चरियिच्चपुत्राननुसंच
यस्मायुष्मतीदेपरिधत्स्ववासः॥१॥वरस्यमंत्रः॥अथोतरीयवसोवरःकन्यायेस
मर्पयति॥ॐयाऽअकृतन्नयन्याऽअतन्वतः॥याश्चादेवीस्तनुभितोतपथ॥ता
स्त्वादेवीर्जरसेसंव्ययस्वायुष्मतीदेपरिधत्स्ववासः॥२॥परस्यरसमंजेथा॥ॐ
समंजन्तुविश्वेदेवासमापोहृदयानिनौ॥समातरिश्वासंधातासमुदेष्ट्रीदधातुनौ॥
सन्मुखीभूत्वावरःपरेतू॥ततोमांगल्यतंतुबंधनं॥ॐमांगल्यतंतुनानेनमजीव
नहेतुना॥कंटेबध्नामिसुभगेत्वंजीवशरदःशतं॥ॐयद्वबध्नंदाक्षायणाहिरण्यं
शतानिकायसुमंस्यमारीत्वागिर्वणोगिरइत्यारभ्यजुषाणोऽअसुराज्यस्यवेतुस्वा ७३
हेत्यंतंनरवध्वोश्चतुर्वीशतितंतुभिःद्विगुणीकृतसूत्रेणयथाचारंवेष्टयेत्॥अयंदेशा

चारः॥ॐपरिवाग्गिर्वणोगिरइमाभवंतु॥विश्वतः॥दृद्धायुमनुदृद्धयोजुष्टाभवंतुजु
ष्टयः॥१॥इंद्रस्यस्यूरसीद्रस्यध्रुवोसि॥ऐंद्रमसिवैश्वदेवमसि॥२॥विभूरसिप्रवा
हणावन्हिरसिहव्यवाहनः॥श्वात्रोसिप्रचेतास्तथोसिविश्ववेदाऽउसिगंसि॥३॥उ
शिगसिकविरंगधारिरसीवंभारिरवस्यूरसिइषस्वाशिध्यूरसिमऊर्क्षीयः॥संम्रा
ऽसिकृशानुःपरिषद्योसिपवमानोनभोसिप्रतक्वामृष्टोसिहव्यसूदनऋतधामासि
स्वर्ज्योतिःसमुद्रोसि॥४॥समुद्रोसिविश्वव्यचाऽअजोस्येकपादहिरसिबुन्ध्योवागस्य
ऽसिसदोसघृतस्यद्वारोमामासंतापमध्वपनेप्रमातिस्वस्तिमस्मिन्यथिदेवयाभव
भूयान्मित्रस्यमा॥५॥मित्रस्यमाचक्षुषेक्षध्वमन्यसगराःसगरास्थसगरेणनाम्ना
रेइणानीकेपातमान्नयःपितृंमानमोवाक्कमामाहिंसिष्ट॥६॥ज्योतिरसिविश्वरूपंवि
श्वेषांदेवानांसमित्॥त्वंसोमतनूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यऽउरुयंतासिवरूथं
स्वाहा॥जुषाणोऽअसुराज्यस्यवेतुस्वाहा॥ ॥तत्रकन्यादानसंकल्पः॥ ॥य
जमानसपत्निकाचेम्य॥सुमुखश्चेत्यादि॰देश॰शुभपुण्यतिथौ॥अस्मिन्पुण्याह

अस्याःममकन्यकायाःअनेनवरेणधर्मप्रजयाउभयोर्वंशयोर्वंशवृध्यर्थंतथाचम
मसमस्तपीतृणांनिरितिद्वायानंदब्रह्मलोकावाप्त्यादिकन्यादानकलोक्तफलाव
प्तयेअनेनवरेणअस्यांकन्यकायांउत्पादयिष्यमाणसंततयंदशपूर्वान्दशापरान्मांच
एकविंशतीपुरुषांनुद्दिश्यश्रीलक्ष्मीनारायणप्रीतयेकन्यादानम
हंकरिष्ये॥वरहस्तेशिवापःसंक्षिप्तिकृत्वा॥ततोवरस्यगोत्रोच्चारः॥अमुकगोत्रोत्पन्नस
अमुकप्रवरस्यअमुकशर्मणःप्रपौत्राय॥अमुकगोत्रोत्पन्नस्यअमुकप्रवरस्यअमुक
शर्मणःपौत्राय॥अमुकगोत्रोत्पन्नस्यअमुकप्रवरस्यअमुकशर्मणःपुत्राय॥॥अमु
कगोत्रस्यअमुकप्रवरस्यअमुकशर्मणःप्रपौत्रि॥अमुकगोत्रोत्पन्नस्यअमुकप्रवरस्य
अमुकशर्मणःपौत्रि॥अमुकगोत्रोत्पन्नस्यअमुकप्रवरस्यअमुकशर्मणःपुत्री॥
एवमेवपुनःपर्यायद्वयमत्का॥पुनः॥अमुकगोत्रायअमुकप्रवरायअमुकशर्मणेव ७४
राया॥अमुकगोत्रांअमुकप्रवरांअमुकीनाम्नीइमांमकन्यायथासंकेतोपस्कारस
हितांप्रजापतिदेवत्यांपुराणोक्तशतगुणीकृतज्योतिष्टोमत्रिरात्रिफलप्राप्तिकामः

यजुर्वेदवाजसनेयमाध्यंदिनीशाखाध्यायिनेवराय भार्यात्वेनतुभ्यमहंसंप्रददे॥॥
इत्युक्तासकुशादर्भकन्यादक्षिणहस्तंवरदक्षिणहस्तेदद्यात्॥वरःप्रतिगृह्णातितेकन्यां
द्यौस्त्वाददातुपृथिवीत्वाप्रतिगृह्णात्विति॥कृतैतत्कन्यादानप्रतिष्ठासिध्यर्थंइमांदक्षिणां
तुभ्यमहंसंप्रददे॥स्वस्तितिवरोब्रूयात्॥ततःकन्यापितापतिंस्वयाधर्मश्चरितव्यःसो
नयासह॥धर्मेचार्थेचकामेचत्वयैनातिचरितव्यं॥नातिचरामितिवरोब्रूयात्॥कोदा
तिकामस्तुतिंत्रिवारंपठेत्॥ॐकोदात्कस्मात्तत्ते॥१॥अथयदन्ददातिकामनेवतद्दातिः
दस्मैप्यमूत्रासदतितत्प्रत्येतिकोदात्कस्माऽअदात्कामोदात्कामायादात्॥कात्तत्ते॥२॥पु
नःद्यौस्त्वाददातु॥कोदात्कात्ते॥३॥यथयज्ञस्तो॥४॥पुनःद्यौस्त्वाद्यज्ञोदात्कज्ञस्तो॥५॥य
थयद्यज्ञायथाभिषेकः॥सयःकामयेतिब्राह्मणंयजेत्॥य॥सयःका०२॥एषवैभूतानां
पृथिवीरसः॥अथप्रार्थना॥कन्यालक्षणसंपन्नांकनकाभरणैर्युतां॥दास्यामिब्रह्म
णेतुभ्यंब्रह्मलोकजिगीषया॥१॥पृथिव्यादिमहद्भूतासाक्षिणःकुलदेवता॥इमांकन्या
प्रदास्यामिपितॄणांतारणायच॥२॥ममवंशेकुलेजातांपोषितांवर्षपंचकां॥तवविप्र

मयादत्तापुत्रपौत्रप्रवर्द्धिनी॥३॥गौरीकन्यामिमांविप्रयथाशक्तिविभूषीतां॥गोत्राय
७५ शर्मणेतुभ्यंदत्तांविप्रसमाश्रय॥४॥ततःशिष्टाचारात्॥ततोगणपतिपूजनं॥अद्य
पूर्वनिर्थौ॥निर्वाहोगभूतंकंकणगणपतिपूजनंकरिष्ये॥गणपतियेनमःपंचोपचारैःपू
जयेत्॥तत्पुरजनपुरःसरंवधूवरयोःपरस्परंकंकणबंधानमस्कारंचकुर्यात्॥वरदक्षिण
हस्तेवधूवामहस्तेयदाबध्नंदाक्षायणाइतिमंत्रेणकंकणंबध्नीयात्॥ॐयेदाबध्नंदाक्षायणा
मृ॥१॥इतिगणपतिपूजनं॥ततस्तांबूलपत्रेणपरस्परंमुखोच्छिष्टकरणं॥लौकीकंकृत्वा
७६ म्रक्षसेचनं॥ततोवरः॥पित्राप्रतामादायगृहीत्वानिष्कामति॥ॐमदैधिमनसाइरंदि
नोनुपवमानोवा॥हिरण्यपणेविकरणःसत्वामन्मनसांकरोतु॥१॥असुकीनिष्क्रमण
प्रभृतिएकःपुरुषउदकुंभंस्कंधेकृत्वादक्षिणतोग्नेर्व्यतःस्थितोभवतु॥उत्तरतोवाअ
भिषेकपर्यंतं॥अथैनांसमीक्षयतिकन्यापितापरस्परंसमीक्षेतां॥ॐअघोरचक्षुर्यति
रघ्न्येधिशिवापशुभ्यःसुमनाःसुवर्चाः॥वीरसूर्देवकामास्योनाशंनोभवद्विपदेशंचतु ७५
ष्पदे॥१॥सोमःप्रथमोविविदेगंधर्वोविविदउत्तरः॥तृतीयोग्निष्टेपतिस्तुरीयस्तेमनु

ष्यजाः॥२॥सोमोददद्गंधर्वायगंधर्वोददग्नये॥रयिंचपुत्रांश्चादादग्निर्मह्यमथोइमां॥३॥सानः
पूषाशिवतमामेरयसान्ऊरूउशतीविहर॥यस्यामुशंतःप्रहरामुशेयंयस्यामुकामा
बहवोनिविष्टेयामित्वरस्यमंत्रपारः॥प्रदक्षिणमग्निपर्याणियंकेपश्चादग्नेस्तेजनीयंकंटं
वादक्षिणपादेनपहत्योपविशति॥मधुवरयोःवेद्यांचोपविश्य॥ततःवधूवरयोःआचमनं॥
अथविवाहभंगाधाय॥यदकर्तुनज्ञाम्यतेतदातस्मिंनेवावसरकर्तव्यं॥सुमुखश्चेत्या
दिस्मृत्युक्तदेशकाल्शुभपुण्यतिथौ॥अस्मिन्पुण्याहेऽअस्याःवध्वाभार्यसंपादनार्थधर्मा
र्थकामप्रजासिध्यर्थंविवाहहोमंकरिष्ये॥तदंगदेवताअन्वाधानंकरिष्ये॥तत्रप्रजापतिं॥
इंद्रं॥अग्निं॥सोमं॥अग्निंवायुं॥सूर्यं॥अग्निवरुणौ॥अग्निवरुणौ॥सवितारं॥विष्णुवि
७६ ष्णोंदेवान्॥मरुत्स्वर्कान्वरुणं॥ऋतुंसहं॥ऋतधामानं॥अग्निंगंधर्वं॥ओषधीः॥अ
प्सरसः॥मुदः॥सर्पंहितं॥विश्वमासानं॥सूर्यंगंधर्वं॥मरिचिः॥अप्सरसः॥सुषुम्णं॥सू
र्यरश्मिं॥चंद्रमसंगंधर्वं॥नक्षत्राणि॥अप्सरसः॥भेकुरिं॥ऋषिं॥विश्वव्यचसंवातं॥
गंधर्वं॥आपः॥अप्सरसः॥ऊर्जं॥भुज्युं॥सुपर्णंयंतंगंधर्वं॥दक्षिणा॥अप्सरसः॥ता
वीः॥प्रजापतिं॥विश्वकर्माणं॥मनसंगंधर्वं॥ऋक्षामाणि॥अप्सरसः॥एष्टिः॥वि

तं॥चित्तिं॥स्रुकूतं॥आकूतिं॥विज्ञातिं॥मनः॥श्रक्वरीः॥दर्शः॥पोर्णमासः॥बृहत्॥
रथंतरं॥प्रजापतिं॥अग्निं भूतानामधिपतिं॥इडऽज्येष्ठानामधिपतिं॥यमः पृथिव्यानाम
धिपतिं॥वायुरंतरिक्षस्याधिपतिं॥सूर्यं दिवोधिपतिं॥चंद्रमसं॥नक्षत्राणामधिपतिं॥बृ
हस्पतिं॥ब्रह्मणोधिपतिं॥ब्रह्मणोधिपतिं॥मित्रं सत्यानामधिपतिं॥वरुणोपामधिपतिं
समुद्रस्योत्यानामधिपतिं॥अन्नपतेन्नस्याज्यानामधिपतिं॥सोमऽओषधीनामधिपतिं
सवितारं प्रसवानामधिपतिं॥रुद्रः पशूनामधिपतिं॥त्वष्टारूपाणामधिपतिं॥विष्णुः पर्व
तानामधिपतिं॥मरुतोगणानामधिपतिं॥पितॄन्॥पितामहान्॥परान्॥अवरान्॥
तताम्॥ततामहान्॥अग्निं॥अग्निं॥अग्निं॥वैवस्वतं॥मृत्युं॥एताः सर्वाः॥आज्येन॥
अग्निं॥अग्निंअग्निं॥त्रिभिर्ऋजेः भगं सकृत्सौ॥प्रजापतिं॥अग्निं॥स्विष्टकृतं॥ए
ताः पुनराज्येन॥एताः॥अंगप्रधानार्थं॥अस्मिन् विवाहहोमाख्येकर्मणि मयोहयश्थो॥
दक्षिणतोब्रह्मासनमास्तरणं॥तत्रब्रह्मोपवेशनं॥अस्मिन्विवाहहोमाख्येकर्मणित्वं ७६
ब्रह्माभवभवोमितिनेनवाच्यतां॥उत्तरतःप्रणितासनं॥यद्वा॥उत्तरतउदपात्रस्थापनं॥

अंतरिक्षिजलेनपूर्य॥भूमौनिधाय॥श्रात्मभ्यप्रणियोत्तरतोग्नेस्थापनं॥बहिर्षिप्रदक्षिण
मग्नेःपरिस्तरणं॥इध्मानादिपूर्वाग्नेदर्भैःस्त्रिपरिस्तरणं॥अर्थवत्पात्रासादनं॥पवित्रछेद
नादर्भास्त्रयः॥पवित्रेद्वे॥प्रोक्षणीपात्रं॥आज्यस्थाली॥सेमार्गकुशाःपंच॥उपयमनकुशाः स
प्त॥समिधस्तिस्रः॥स्रुवः॥आज्यं॥तंडुलाः॥पूर्णपात्रं॥वरोवा॥उपकल्पनिश्राचार्यायव
रदद्यं॥इष्टपुरुषः॥पवित्रछेदनं॥पवित्रीकरणं॥हस्योरुपरित्रीणि निधाय॥द्विमूलेनदौ क्षि
कुशौप्रादेशिनीकृत्य॥सर्वांगुलपत्रधृत्वांगुष्ठांगुलिपर्वभ्यांछित्वानुत्तरतःक्षिप्तेद्वे॥प्रोक्ष
णीपात्रेप्रणितोदकमासिच्य॥पात्रीतरणंगृहीत्वा॥पवित्राभ्यामुत्पवनं॥प्रोक्षणीनांसव्यहस्त
करणं॥दक्षिणेनोद्गिरनं॥प्रणितोदकेनप्रोक्षणीनांप्रोक्षणं॥आज्यस्थाल्याप्रोक्षणं॥समार्ग
कुशानांप्रोक्षणं॥उपयमनकुशानांप्रोक्षणं॥समिधाप्रोक्षणं॥स्रुवस्यप्रोक्षणं॥आज्यस्य
प्रोक्षणं॥पूर्णपात्रस्यप्रोक्षणं॥असेचरप्रोक्षणीनिधानं॥आज्यस्थाल्यामाज्यनिर्वापः॥
अग्नेर्दक्षिणभागेब्रह्मेप आज्यनिर्वापः॥ब्रह्मणवन्हिंपरि॥दक्षिणतआज्याधिश्रयणं॥
उल्मुकेनऽआज्ययोःपर्यग्निकरणं॥अधिश्रनेस्रुवस्यप्रतपनं॥भ्रुजापुष्करस्यसेमार्गकु

शौस्रुवस्य संमार्जनं॥उत्तानपुष्करस्यबुन्नादारभ्याधस्तन्मूलेस्त्रिवारंसमूज्य॥सेमार्गकुशा
७) संनूत्तोत्राश्य॥प्रणितोदकेनाभ्युक्ष॥पुष्करादारभ्ययुनःप्रतप्य॥स्रुवंपूर्ववदुद्गृह्य॥धनिधा
नं॥आज्योद्वासनं॥पूर्वेणोत्तरतोनीत्वापश्चादग्नेरवस्थापनं॥उदक्कोयत्स्यर्शः॥आज्यस्यप
श्चिमतः॥पवित्रेणाज्योसवनं॥अवेक्षणं॥अपद्रव्यनिरसनं॥प्रोक्षण्यःप्रत्यक्सवनं॥उपय
मनकुशादानं॥समिधादानं॥तिष्ठन्समिधोभ्याधाय॥प्रोक्षण्युदकशेषेणसपवित्रहस्तेनाग्नेः॥
प्रदक्षिणं॥पर्यूक्षणं॥पवित्रयोःप्रणीतासुविनिधानं॥दक्षिणंजान्वाच्य॥स्रुवेणाज्यमादाय
मनसाप्रजापतिंध्यात्वाब्रह्मणान्वारब्धेनजुहोति॥तत्रश्राघारावाज्यभागौस्रुवेणहोमः॥
स्वाहाकारोच्चैप्रजापतयेउपांशु॥नममेत्यूच्चैः॥ॐमनसाप्रजापतयेस्वाहा॥इदंप्रजापत
येनमम॥ॐइंद्रायस्वाहा॥इदमिंद्रायनमम॥२॥ॐअग्नयेस्वाहा॥इदमग्नयेनमम॥३॥
ॐसोमायस्वाहा॥इदंसोमायइदंनमम॥४॥पात्रांतरेसंस्रुवान्यातयेत्॥ततोभूराद्यानवा
हुतयः॥ॐभूःस्वाहा॥इदमग्नयेनमम॥१॥ॐभुवःस्वाहा॥इदंवायवेनमम॥२॥ॐस्वः ७१
स्वाहा॥इदंसूर्यायइदंनमम॥३॥ॐत्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासि

सिष्टः॥यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्॥स्वाहा॥इदमग्नि
वरुणाभ्यांनमम॥५॥ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥अवयक्ष्व
णोवरुणंरराणोवीहिमृडीकंसुहवोनएधि॥स्वाहा॥इदमग्निवरुणाभ्यांनमम॥६॥
ॐअयाश्वाग्नेअस्यनभिरस्तिपाश्वसत्यमित्वमयाअसि॥अयानोयज्ञंवहास्यायानोधेहिभे
षजंस्वाहा॥इदमग्नयेनमम॥७॥ॐयतेशतंवरुणजालपाशायंसहस्रंयशयापाशाविततामहांतं॥
तेभिर्नोअद्यसवितोतापांसुर्विश्वेभिरद्यपथिभिःसुगेभिर्देवेभ्योरन्तरिक्षेभ्योमरुद्भ्यस्वर्केभ्यश्चनमम॥८॥ॐउदुत्तमं
रुणपाशमस्मदवाधमंविमध्यमंश्रथायाअथावयमादित्यव्रतेतवानागसोऽदितयेस्या
मस्वाहा॥इदंवरुणादित्यादितयेनमम॥इदंसर्वंत्रायस्विनास्यं॥अथराष्ट्रभृद्धोमः॥ॐऋतं
पाऽऋतधामाग्निर्गंधर्वःसनदेवब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥इदमृतासाऽऋतधाग्नये ग
येगंधर्वायनमम॥१॥ॐऋतापाऽऋतधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सरसोमुदोनामताभ्यः
स्वाहा॥इदमोषधीभ्योऽप्सरोभ्योमुदेनमम॥२॥ॐसंहितोविश्वसामासूर्योगंधर्वः
सनदेवब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥इदंसंहिताय विश्वसाम्ने सूर्यायगंधर्वायनमम॥३॥
ॐसंहितोविश्वसामासूर्योगंधर्वस्तस्यमरीचयोऽप्सरसऽआयुवोनामताभ्यस्वाहा॥इदंम

रीचीभ्योप्सरोभ्यऽआयुभ्योनमम॥८॥ॐसुषुम्णाःसूर्यरश्मिश्चंद्रमागंधर्वस्तऽइडैंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥इदंसुषुम्णायसूर्यरश्मयेचंद्रमसेगंधर्वायनमम॥९॥ॐ
सुषुम्णःसूयरश्मिश्चंद्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरयोनामतेभ्यस्वाहा॥इ
दंनक्षत्रेभ्योप्सरोभ्योकुरुभ्योनममम॥१०॥ॐइषिरोविश्वव्यचाबातोगंधर्वःसनऽइडैंब्रह्मक्षत्रं
पातुतस्मैस्वाहावाट्॥इदंमिषीरायविश्वव्यचसेबातायगंधर्वायनमम॥११॥ॐइषिरो
विश्वव्यचाबातोगंधर्वस्तस्यापोस्वसऽऊर्जोनामताभ्यस्वाहा॥इदमद्भ्योप्सरोभ्यऽऊर्ग्भ्यो
यज्ञो नमम॥१२॥ॐभुज्युःसुपर्णोगंधर्वोसनऽइडैंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥इदंभुज्यवेसु
पर्णायस्वायगंधर्वायनमम॥ॐभुज्युःसुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणाऽअप्सरसस्तावा
नामताभ्यःस्वाहा॥इददक्षिणाभ्योप्सरोभ्यस्तावाभ्योनमम॥१३॥ॐप्रजापतिर्विश्वकर्मा
मनोगंधर्वःसनऽइडैंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥इदंप्रजापतयेविश्वकर्मणेमनसेगंधर्वाय
नमम॥१४॥ॐप्रजापतिर्विश्वकर्मामनोगंधर्वस्तस्यऋक्तामन्यप्सरसएष्टयोनामता
भ्यःस्वाहा॥इदंमक्तामेभ्योप्सरोभ्यःऽएष्टीभ्योनमम॥१५॥इतिराष्ट्रभृद्धोमः॥अथ

जहाहोमः॥ ॥ॐचित्तेचस्वाहा॥इदंचित्तायनमम॥१॥ॐचित्तिश्चस्वाहा॥इदंचि
च त्यैनमम॥२॥ॐआकूतैस्वाहा॥इदमाकूतायनमम॥३॥ॐआकूतिश्चस्वाहा॥इदमा
कूत्यैनमम॥४॥ॐविज्ञातेचस्वाहा॥इदंविज्ञातायनमम॥५॥ॐविज्ञातिश्चस्वाहा॥
इदंविज्ञात्यैनमम॥६॥ॐमनसश्चस्वाहा॥इदंमनसेनमम॥७॥ॐशाकरीश्चस्वाहा॥
इदंशाकरीभ्योनम॥८॥ॐदर्शश्चस्वाहा॥इददर्शायनमम॥९॥ॐपौर्णमासीचस्वाहा॥
इदंपौर्णमासायनमम॥१०॥ॐबृहच्चस्वाहा॥इदंबृहतेनमम॥११॥ॐरथंतरंचस्वाहा
इदंरथंतरायनमम॥१२॥ॐप्रजापतिर्निर्ऋत्याऽआयश्चदुग्धःपृतनाजयेषु॥तस्मैविशः
समनमंतसर्वाऽउग्रःसहमोबभूवस्वाहा॥इदंप्रजापतयेजयानिन्द्रायनमम॥१३॥इति
जयाहोमः॥ ॥अथाभ्यातानहोमः॥ ॥कारिका॥ ॥पूर्वंत्यागेपरंमृत्योर्यमृ
त्योश्चदक्षिणे॥पश्चिमेरुद्रत्यागेचापित्यागेतदुत्तरे॥१॥रोद्रेतुराक्षसेपित्र्यांसुरेचाभि
चारिकं॥ऐंद्राग्नेत्रस्मृद्दापोआदृभ्यामात्मनेवच॥२॥कर्मारंभेयमत्यागेरुद्रत्यागेपिता
महं॥परंमृत्यंत्रयस्थानेम्यर्शनेपंचभिर्हरेत्॥३॥ ॥ॐअग्निर्भूतानामधिपतिस
मावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्योपुरोयामस्मिन्कर्मण्यस्यांदेवहूत्यांभूस्वाहा॥

इदमग्नयेभूतानामधिपतयेनमम॥१॥ॐइन्द्रोज्येष्ठानामस्वाहा॥इदमिंद्रायज्येष्ठानामधिप
तयेनमम॥२॥ॐयमःपृथिव्यानाम॰स्वाहा॥इदंयमायपृथिव्यानामधिपतयेनमम॥३॥दक्षि
णेत्यागः॥उदकांस्पर्शः॥ॐवायुरंतरिक्षस्याधिपत॰स्वाहा॥इदंवायवेंतरिक्षाधिपतयेनमम॥४॥
ॐसूर्योदिवोधिपति॰स्वाहा॥इदंसूर्यायदिवोधिपतयेनमम॥५॥ॐचंद्रमानक्षत्राणामधि
पतिस्वाहा॥इदंचंद्रमसेनक्षत्राणामधिपतयेनममें॥ॐबृहस्पतिर्ब्रह्मणोधिप॰स्वाहा॥इ
दंबृहस्पतयेब्रह्मणोधिपतयेनमम॥७॥ॐमित्रसत्यानामधिप॰हा॥इदंमित्रायसत्या
यामधिपतयेनमम॥८॥ॐवरुणोपामधिपति॰हा॥इदंवरुणायापामधिपतयेनमम॥९॥
ॐसमुद्रस्रोत्यानामधिपति॰हा॥इदंसमुद्रायस्रोत्यानामधिपतयेनमम॥१०॥ॐअन्न
ंसाम्राज्यानाहा॥इदमन्नायसाम्राज्यानामधिपतयेनमम॥११॥ॐसोमोयोषधिनाम
धिप॰हा॥इदंसोमायोषधीनामधीपतयेनमम॥१२॥ॐसवितासप्तानामधिपत॰॥हा॥
इदंसवितानामधिपतयेनमम॥१३॥ॐरुद्रःपशूनामधिप॰हा॥इदंरुद्रायपशुपतयेनमम॥१४॥
पश्चिमेत्यागः॥उदकोपस्पर्शः॥ॐत्वष्टारूपाणामधिप॰हा॥इदंत्वष्ट्रेरूपाणामधिपतये ७१
नमम॥१५॥ॐविष्णुःपर्वतानामधिप॰हा॥इदंविष्णवेपर्वतानामधिपतयेनमम॥१६॥

ॐमरुतोगणानामधिपतयस्तेमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्या॰हा॥इदंमरुद्भ्योगणा
नामधिपतयेनमम॥१७॥ॐपितरःपितामहाःपरेवरेततास्तयामाहाः॥इदंमावत्वस्मिन्ब्रे
ह्मण्य॰स्वाहा॥इदंपितृभ्यःपितामहेभ्यःपरेभ्योवरेभ्योततेभ्यस्तस्तामहेभ्योनमम॥१८॥
उत्तरेत्यागः॥उदकोपस्पर्शः॥इतिभ्यांताहोमः॥ ॥अथाग्निरित्यभिषेचकं॥ ॥
ॐअग्निरेतुप्रथमोदेवयानाःसोस्यैप्रजांमुंचतुमृत्युपाशात्॥तदस्यैराजावरुणोन्यमनु
मतायतयंस्त्रिपौत्रमघंनयादस्वाहा॥इदमग्नयेनमम॥१॥ॐइमामग्निस्त्रायतां
गार्हपत्यंप्रजामस्यैनयतुदीर्घमायुः॥आस्यैवोपस्थाजिवतामस्कमातापौत्रमानंदमभि
विबुध्यतामियंस्वाहा॥इदमग्नयेनमम॥२॥ॐस्वस्तिनोअग्निर्दिवापृथिव्याविश्वानिध
ह्ययथायजत्र॥यदस्यांमहिदिविजातंप्रशस्तंतस्मासुद्रविणंधेहिचित्रंस्वाहा॥इदम
ग्नयेनमम॥३॥सुगन्नःपथाप्रदिशन्नएहिज्योतिष्मद्धेह्यजरंनआयुः॥अपैतुमृत्यमृ
तंमऽआगाद्वैवस्वतोनोअभयंकृणोतुनस्वाहा॥इदंवैवस्वतायनमम॥४॥वस्त्रप
अनु उंतूह्मी॥ॐपरमृत्योऽनुपरेहिपंथांयस्तेऽअन्यइतरोदेवयानात्॥चक्षुष्मतेशृण्वतेतेब्र
वीमिमानःप्रजांरीरिषोमोतवीरान्स्वाहा॥इदंमृत्यवेनमम॥५॥पूर्वेत्यागः॥उदकोप

गृह्णाति॥इतिअग्निपक्वं॥अथलाजाहोमः॥कुमार्याभ्रातापलाशशाखायांलाजानेत्यंज
लिनालाजाञ्जलावावपति॥तानजुहोति॥सपृक्षेतनतिष्ठति॥तान्कुमारीत्रिरुत्वाजुहोति॥ॐ
अर्यमणंदेवंकन्याऽअग्निमयक्षत॥मनोऽअर्यमादेवःप्रेतोमुंचतुमापतयैस्वाहा॥इदमर्य
मणेनमम॥१॥अनेनास्थालाजाहोमेनतिस्रोऽाज्याहुतीर्जुहोति॥ॐइयन्नार्युपब्रूतेलाजानावपन्तिका॥
आयुष्मान्मेपतिरेधंतञ्जानयोममस्वाहा॥इदमग्नयेनमम॥अनेनाञ्जलिस्थमर्जुहो
ति॥इमाँलाजानावपाम्यग्नौसमृद्धिकरणंतव॥ममतुभ्यञ्चसंवननंतदग्निरनुमन्यतामि
यंस्वाहा॥इदमग्नयेनमम॥२॥अनेनाञ्जलिस्थंसर्वंजुहोतिमन्त्रत्रयंकन्यायाःपतिः॥६॥
अथवरः॥गृभ्णामितेतिमंत्रेणकन्यायाःअंगुष्ठसहितंदक्षिणहस्तंगृह्णाति॥अथास्यैदक्षि
णंहस्तंवरोगृह्णाति॥ॐसांगुष्ठंगृभ्णामितेसौभगत्वायहस्तंमयापत्याजरदष्टिर्यथा
सः॥भगोऽअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः॥ममोहमस्मिसात्वंसात्वं
मस्यामोहं॥सामाहमस्मिऋक्त्वंद्यौरहंपृथिवीत्वं॥२॥तावेहिविवाहावहैसहरेतोदधावहै
प्रजांप्रजनयावहैपुत्रान्विंदावहैबहून्॥३॥तेसंतुजरदष्टयःसंप्रियौरोचिष्णुसुमनस्यमा
नौ॥पश्येमशरदःशतंजीवेमशरदःशतंशृणुयामशरदःशतंप्रब्रवामशरदःशतं॥इतिवरस्यमंत्रपाठः॥

अथैनामश्मानंदक्षिणपादेनारोहयति॥ॐआरोहेममश्मानमस्येवत्वंस्थिराभव॥
अभितिष्ठपृतन्यतोवबाधस्वपृतनायतः॥१॥इत्यथगाथागायति॥ॐवरस्यतिष्ठेदमवसुभग
वाजिनीवति॥यात्वाविश्वस्यभूतस्यप्रजायामस्याग्रतः॥२॥यस्याभूतंसमभवद्यस्यो
विश्वमिदंजगत्॥तामद्यगाथांगास्योमियास्त्रीणामुत्तमंयशः॥३॥कन्याग्नेतुभ्यंवास्त्र
यो॥ॐतुभ्यमग्रेपर्यवहन्सूर्यांवहतुनासहा॥पुनःपतिभ्योजायांदाग्नेःप्रजयासहा॥४॥व
रस्यमंत्रः॥परिक्रमणस्यादौवारद्वयंएवंपुनरपिकर्तव्यं॥पु॰ॐअर्यमाणं॰॥१॥ॐअथै
नामश्मानंपूषन्नार्युपब्रूते॥२॥ॐइमाँलाजानाग्नौ॥३॥ॐसांगुष्ठंगृभ्णा॰॥४॥ॐआरोहेममश्मा॰॥३॥
ॐतुभ्यमग्रे॰॥३॥पुनःॐअर्यमाणं॥१॥ॐइयन्नार्युपब्रूते॰॥२॥ॐइमाँलाजानाग्नौ॰॥३॥
ॐसांगुष्ठंगृभ्णा॰॥१॥ॐआरोहेममश्मा॰॥२॥ॐतुभ्यमग्रे॰॥३॥पुनःॐअर्यमाणं॰॥१॥
ॐइयन्नार्युपब्रूते॥२॥ततस्तृतीयपरिक्रमणानंतरंकुमार्याभ्रातार्पूर्वकोणप्रदेशेनस
र्वान्लाजाँकुमार्याः॥अंजलावावपतास्तिष्ठतिकुमारीजुहोति॥ॐभगायस्वाहा॥इदं
भगायनमम॥१॥ततःस्रुग्घी-चतुर्थपरिक्रमणं॥आज्येन॥ॐप्रजापतयेस्वाहा॥इदंप्र
जापतयेनमम॥२॥अथैनांवधूमरिचीपूंसतयादानिःप्रक्रामयति॥ ॥अद्यपूर्वोतिथौ॥

विवाहसांगतासिध्यर्थं वधूवरयोः ब्रह्मायुष्यप्राप्त्यर्थंसप्तार्चलपूजनंकरिष्ये॥सप्तऋषयः
प्रतिहिताःशरीरेसप्तरक्षंतिसदमप्रमादं॥सप्तापः स्वपतोलोकमीयुस्तत्रजाग्रतोऽअस्व
प्नजोसत्रसदोचदेवो॥१॥इतिमंत्रेण॥सप्तपदीदेवताभ्योनमः॥पंचोपपचारैःसंपूज्य॥
अनयापूजयासप्तपदीदेवताःप्रियेतां॥इतिवरेणोक्तमंत्रेणवधूरेकंपदंदक्षात्कदका॥ॐए
कमिषेविष्णुस्त्वानयतु॥१॥ॐऊर्जेविष्णुस्त्वानयतु॥२॥त्रीणिरायस्पोषायविष्णुस्त्वानयतु॥३॥
चत्वारिमयोभवायविष्णुस्त्वानयतु॥४॥पंचपशुभ्योविष्णुस्त्वानयतु॥५॥षडृतुभ्योविष्णु
स्त्वानयतु॥६॥सखेसप्तपदाभवसामामनुव्रताभवविष्णुस्त्वानयतु॥७॥इत्युक्तवरोवरंदक्षि
णपादेन॥अथवरःस्कंधेकृत्वाऽदकरंतस्तेकृण्वंतुभेषजमिति॥पुनस्तत एवकुंभाऽदक
मादायापोहिष्ठेतित्रिभिर्मूर्द्धन्यभिषिंचतिवधूः॥आपःशिवाशिवतमाःशांताशांततमा
स्तांस्तेकृण्वंतुभेषजं॥१॥इतिवरःअभिषिंचति॥अथवधूः॥अभिषिंचति॥ॐआपोहि॰
ष्ठा॥१॥योवः॥शि॰वा॥२॥तस्माऽअ॰नः॥अथवरःप्रेक्षेदादित्यंसूर्यमुद्वीक्षस्वेति॥दिवावि ८१
वाहश्चेद्दृश्यःसूर्यमुदीक्षते॥तच्चक्षुरित्याश्रृणुयामशरदःशतमित्येतयर्चामंत्रः॥तच्च
क्षुर्देवहितं॥१॥अथवरोवध्वाः दक्षिणांसस्योपरिस्वहस्तं॥नीत्वातस्याःहृदयमालभ

ते॥ॐममव्रतेतेहृदयंदधामिममचित्तमनुचित्तेतेअस्तु॥ममवाचमेकमनाऽसिस्वाहाप्रजापति
ष्ट्वानियुनक्तुमह्यं॥वरस्यमंत्रपाठः॥अथैनांवधूमभिमंत्रयतेवरः॥ॐसमेगा॰स्तांसरियवधूरि
माऽंसमंतपशुतु॥सोभाग्यमस्यैदत्वायथास्त्वंविपरेतिनेतितां॥॥ततोहृदयपुरुषऊन्मथ्य
ाग्नेरग्नातुगुप्तअगारेअनुदेहंरक्षितेचर्मण्युपवेशयति॥तदुपवधूंदृष्ट्वापुरुषऊन्मथ्याऽक्षी
ण्युपवेशयति॥ॐइहगावोनिषीदंत्विहपुरुषाः॥इहोसहस्रदक्षिणोऽहयज्ञपूषानिषी
दतु॥अनेनमंत्रेणहृदयपुरुषस्यमंत्रपाठः॥वाममद्यइतिमंत्रेणवरःवधूकर्णेजपति॥तत्तमं
त्रः॥वाममद्यसवितुर्वाममभ्वोदिवेदिवेवाममस्मभ्यंसावीः॥वामस्यहिक्षयस्यदेवभूरे
रयाधिवोवामभाजःस्यामा॥१॥दक्षिणऊहेकऊपदधातितदेतांःपुण्यालक्ष्मीर्दक्षि
णतोदधातइतितस्माद्यस्यदक्षिणतोलक्ष्मभवतितंपुण्यलक्ष्मीकंऽइत्याचक्षतऽउत्तर
तऽआयतनाहिस्त्रीनृतंकृतमेवपुरस्तात्वेवैनाऽउपरध्यादग्नेहवीरसिदेवहूतजिह्वा
भव थैतांः॥पुण्यालक्ष्मीर्मुखतोधत्तेतस्माद्यस्यमुखेलक्ष्मीतितंपुण्यालक्ष्मीकंऽइत्याचक्ष
ते॥२॥ततोवरऽआगत्यपश्चाद्ग्नेरुपविश्य॥ततस्विष्टकृत॥ॐअग्नयेस्विष्टकृतेस्वाहा॥

इदमन्नयस्विष्टकृतयेनमम॥१॥ॐसंस्रवप्राशनं॥आचमनं॥पवित्राभ्यामार्जनं॥अग्नौ
पवित्रापतियुक्तिः॥ब्रह्मणेपूर्णपात्रदानं॥कृतस्यविवाहाख्यस्यकर्मणःसांगतासिध्यर्थं
ब्रह्मणइदंपूर्णपात्रदानंतुभ्यमहंसंप्रददे॥प्रतिगृह्णंतु॥प्रतिगृह्णामि॥दानसांगतासिध्यर्थं॥इ
मांदक्षिणांतुभ्यमहंसंप्रददे॥अग्नेपश्चिमभागेप्रणीताविमोकः॥ॐआपःशिवाःशिवोनः॥५
स्वकीयाचार्यायगोदानं॥क्षत्रियोग्रामं॥वैश्योअश्वं॥दिवाविवाहस्तदाम्नामितेध्रुवंदर्श
यति॥वरावधूः॥अथरात्रौविवाहस्तदावरयानंतरमेववरावधूः॥१॥ध्रुवमीक्षस्वेतिप्रे
षंदत्वा॥ध्रुवमसित्येवंमंत्रेपठति॥तत्रमंत्रः॥ध्रुवमसिध्रुवंत्वापश्यामिध्रुवेवधीपोष्येमेम
ह्यंत्वादात्॥बृहस्पतिर्मयापत्याप्रजावतीसजीवशरदःशतमिति वरस्यमंत्रः॥१॥एतस्मि
न्मंत्रेवरोणोक्तेवधूर्ध्रुवमीक्षते॥सायंदिनध्रुवंनक्षत्रंपश्यतथापश्यामि॥१॥ॐसायंदिनपश्ये
त्यश्यामीत्येवब्रूयात्॥विवाहदारभ्यत्रिरात्रमक्षारलवणाश्निीयुःस्यातांजायापती॥अ
धःशय्यीयातांत्रिरात्रमेवाद्यात्तब्राह्मणभोजनसंकल्पः॥अथाग्निपूजनं॥कृतस्य
विवाहाख्यस्यकर्मणःसांगतासिध्यर्थंस्मृत्युक्तान्पंचाशत्संख्याकान्ब्राह्मणान्भो

जयीष्ये॥नानानांगोत्रेभ्योब्राह्मणेभ्यः॥भूयसीदक्षिणादास्येतेनश्रीकर्मांगदेवताःप्रि
यंतां॥अथाग्निविसर्जनं॥गच्छगच्छसन्॥१॥अथाशिर्वादमंत्रैःब्राह्मणाःवधूवरयोः
आशीर्वदंतुः॥तन्नमंत्राः॥यद्देवेताहाजप्रसवीयंजुहोतितः॥देवताःकृताएतेनसवेनये
तत्साध्यमाणोभवतिताएवेतत्प्रीणातिताऽअस्माइष्टाःप्रीताएतंसवमनुमन्यंतेताभिरनु
मतःसूयतेयमस्मैवैराजानोराज्यमनुमन्यतेसराजाभवति॥१॥अथातोराष्ट्रभृतोजुहोति॥
राजानोवैराष्ट्रभृतस्तेहिराष्ट्राणिबिभ्रत्येताहदेवताःसृताऽएतेनसवेनयेनेतत्साध्यमाणो
भवतिताऽएवेतत्प्रीणातिताऽअस्माइष्टाःप्रीताएतंसवमनुमन्यंतेताभिरनुमतःसू
यतेयमस्मैवैराजानोब्राह्मणराज्यमनुमन्यतेसराजाभवतित्य॥२॥अथस्थशीर्षजुहो
तित्य॥एषवैसवऽएतद्देवसूयतेयमस्मैतमेतादेवताःसवमनुमन्यंतेताभिरनुमतः॥
सूयतेयस्मैवैराजानोराज्यमनुमन्यतेसराजाभवति॥३॥तद्देवस्यसवेवै॥एतानिहवि
ष्यिनिर्वपेत्॥एताहदेवताःसृताऽएतानसवेयेनेतत्साध्यमाणोभवतिताऽएवेतत्प्रीणा
तिताऽअस्माइष्टाःप्रीताएतंसवमनुमन्यंतेताभिरनुमतःसूयतेयस्मैवैराजानोराज्य
मनुमन्यतेसराजाभवति॥४॥अथराजानमभिष्ट्यानोजुहोति॥त्येएषवैसवएतद्दे

स्मूयतेयमस्मै तमेतादेवताःसर्वमनुमन्यतेयाभिरनुमतःस्मूयतेयस्मैवै राजानोराज्यम
नुमन्यतेराजाभवति॥५॥सर्वेषांवा एषदानानांश्रमायत्सामसर्वेषामेवैनमेतद्दानानांपूर
सेनाभिषिंचति॥६॥ततोभवतिशतायुर्वैपुरुषःशतेन्द्रियऽआयुरेवेन्द्रियेवीर्यमात्मन्धत्ते॥७॥
हेपत्यारविछिन्नाग्नीतिरस्कृ॥इतिविवाहकर्मसमाप्तः॥ ॥अथऐरणीप्रदानः॥ ॥
ततःश्राचार्यश्रासंविवाहचतुर्थीदिनेकार्य॥यजमानसपत्नीकश्राचम्याःसुमुखश्चेत्या
दिकालज्ञानेकृत्वा॥देशकालौस्मृत्वा॥शुभपुण्यतिथौ॥मयाचतुर्भिर्होमैःनिष्पादितवि
वाहाख्यस्यकर्मणःसांगतासिध्यर्थंश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंवधुवरयोःब्रह्मा
युष्यप्राप्त्यर्थंकन्यादानफलसंपूर्णतायैवेशाभिरध्यर्थंश्रीउमामहेश्वरप्रीत्यर्थंवरभात्रे
ऐरणिप्रदानंकरिष्ये॥तत्रादौनिर्विघ्नार्थंमहागणपतिपूजनंकरिष्ये॥गणानांत्वेतिम
न्त्रेणमहागणपतयेनमःषोडशोपचारैःपूजयेत्॥अनयापूजयामहागणपतिःप्रियतां॥
तदंगउमामहेश्वरपूजनं॥करिष्ये॥श्रीश्चतेलक्ष्मीश्चेति॥१॥देविवाचमजुन॥२॥उमामहे ८३
श्वराभ्यांनमःषोडशोपचारैःपूजयेत्॥अनयापूजयाउमामहेश्वरौप्रियेतां॥अथऐरणीश्रा
र्थना॥ऐरणीत्वंउमादेवीमहेशोगिरिजापतिःअतस्त्वांपूजयिष्यामिऐरणीसर्वका

मदं॥१॥सवस्त्रांचसदीपांचभूर्यंषोडशभिर्युतां॥वरमात्रेप्रदास्यामिकन्यादानस्यसिद्धये॥२॥
कनकरुद्रसंख्याकैःसुवर्णपरिपूरितैः॥एतावदेरणीरूपंकर्तव्यंप्रीतिवर्द्धनं॥३॥वंशोवंश
करश्चैववंशोवंशसमुद्भवः॥वंशपात्रमिदंदानंवंशवृद्धिकरंपरं॥४॥वंशानामुत्तमंस्थानम
तःशांतिप्रयच्छमे॥महद्भूतमयंपात्रंनानापक्वान्नपूरितं॥५॥सवस्त्रफलतांबूलदक्षि
वंशवर्द्धनं॥वंशपात्राणिसर्वाणिमयासंपादितानिवै॥६॥उमाकांतप्रदास्यामिममवंशाभि
वृद्धये॥वस्त्रेणाच्छादितांचैवफलहेमसमन्वितां॥७॥यावच्चंद्रार्कयोश्चावतिष्ठतिमेदिनी॥
तावद्विर्वंशवृद्धिर्मेदेहिमेशंकरप्रिये॥८॥तदंगब्राह्मणपूजनंकरिष्ये॥वस्त्रालंकारादिभिर्यथा
विभवंपूजयेत्॥शिरमानहस्रशिवायःसोमनस्यमस्तुभस्तुसोमनोयं॥अथंतेवारिष्टंचास्तु,
अस्त्वक्षतमरिष्टंच॥गंधाःपांतुसुमंगल्यंचास्तु॥तांबूलानिपांतुऐश्वर्यमस्तु॥दक्षिणाः
पांतुबहुदत्तंचास्तु॥इदंऐरणीवंशपात्रदानंवरमात्रतुभ्यमहंसंप्रददे॥प्रतिगृह्णामि॥
अनेनऐरणीवंशपात्रदानेनउमामहेश्वरौप्रियेतां॥दानसांगतासिध्यर्थंइमांदक्षिणांतुभ्य
महंसंप्रददे॥ततोवरगोत्रज्यादीनांगंधादिभिःवस्त्रादिभिःपूजयेत्॥ततोवधूगोत्रजाऐर
णीवंशपात्रंगृहीत्वा॥वरगोत्रजादीनांशिरसिधारयेयुः॥तत्रमंत्रः॥घृतवतीभुवनाश्री

योर्विपृथिवी मधुद्घेस्कोपवसा॥ द्यावापृथिवी वरुणस्यधर्मणा विष्णुर्त्रि तेअजरेभुरिरेतसा॥१॥
इतिमंत्रेण त्रिवारं शिरसिधारयेयुः॥अथकन्यानिवेदनंअष्टवर्षाइयं कन्यापुत्रवत्पालिताम
याइदानीतवपुत्रायदत्तास्नेहेनपालनीता॥१॥अनेनवरस्यपितुरुत्संगेदद्यात्॥अस्मा इ
दिसुरुद्धंधून्त्यक्षायातिभवद्वहं॥अतिस्नेहेनवेमातःकन्यामपरिपालय॥२॥इतिव
मातुरुत्संगेदद्यात्॥इयं कन्या मयादत्ता॥ तवविप्रसहायिनी॥स्वदेशेपरदेशेवा परिपाल्य
कुलोचितम्॥३॥इतिमंत्रेण वरत्सउत्संगेदद्यात्॥ एभिर्ब्राह्मणैःसहयथाशक्त्या वायना
दिदद्यात्॥अथवरआचमनं॥अद्यपूर्वोक्तगतिथौ॥ विवाहसांगतासिध्यर्थं वशिष्टारुंधतिपू
जनंकरिष्ये॥वशिष्टारुंधत्यैनमःशोडशोपचारैःपूजयेत्॥अरुंधत्यर्घः॥अरुंधतीमाहाभा
गेवशिष्टप्रियवल्लभे॥सौभाग्यंसततंदेही गृहाणार्घ्यंनमोस्तुते॥१॥इतिअरुंधत्यर्घः॥अ
नयापूजयाअरुंधतीःप्रियतां॥कृतस्यैरणीप्रदानाख्यस्यकर्मणः सांगतासिध्यर्थंयथाशक्त्या ब्राह्मणानभूयसीदक्षिणांदास्ये॥तेनश्रीकर्मांगदेवताःप्रियंतां॥ततोगणपतिविसर्ज
र्जनं॥यांतुदेवगणेत्यादि॥१॥इत्यैरणीप्रदानं॥अथवधूप्रवेशः॥ ॥तत्रपूर्वोक्तकालै
वरपित्रादत्तावधूंगृहीत्वास्वगृहमागत्यगणपतिकुलदेवतागृहंनमस्कृत्य॥वरवधूभ्यां

चमनं॥सुमुखश्चेत्यादिकः देशकालशुभपुण्यतिथौ॥ममश्रौतस्मार्तपुराणोक्त
फलप्राप्त्यर्थं॥नववधूपगृहप्रवेशंकरिष्ये॥तत्रादौनिर्विघ्नार्थंगणपतिपूजनंकरिष्ये॥अंग
लेनविहितेस्वस्तिपुण्याहवाचनंकरिष्ये॥लक्ष्मीपूजनंकरिष्ये॥हरिहरब्रह्मगणेशपूजनंस्व
स्तिवाचनंकृत्वा॥तदंगलक्ष्मीपुनंकरिष्ये॥देवींवाचमंत्रयेत्॥इतिमंत्रेणमहालक्ष्म्यैनमःइत्यु
शोपचारैःपूजयेत्॥अनयापूजयामहालक्ष्मीःप्रीयतां॥तदंगब्राह्मणपूजनंकरिष्ये॥वस्त्रालं
कारादिभिर्यथाविभवंपूजयेत्॥यथाकुलाचारंकुर्यात्॥कृतस्यवधूप्रवेशाख्यस्यकर्मणःसांग
तासिध्यर्थंयथाशक्त्याब्राह्मणानभूयसीदक्षिणांदास्ये॥तेनश्रीकर्मांगदेवताःप्रियंतां॥
एभिःब्राह्मणैसहयथाशक्त्यायनादानिदद्यात्॥ततोगणपतिलक्ष्मीविसर्जनं॥यांतुदेव-
चा॥इतिवधूप्रवेशः॥अथचतुर्थिकर्म॥ ॥अपरात्रेकुर्यात्॥तत्रवरःवध्वासहवधू
पीतगृहेगत्वापूर्वोक्तस्नात्वा॥सुमुखश्चेत्यादिकः देशकालशुभपुण्यतिथौ॥विवाहकरे
शत्वाचतुर्थिकर्मकरिष्ये॥पुनः॥अद्यपूर्वोक्ततिथौ॥ममविवाहाग्निनाशानिमित्तंयथाश
क्त्याजनप्रत्याम्नायद्वाराप्रायश्चित्तहोमंकरिष्ये॥तत्रादौनि

विघ्नार्थं महागणपतिपूजनंकरिष्ये॥गणानांत्वेतिमंत्रेणषोडशोपचारैःपूजनंअनयापूजयागणे
शप्रियतां॥अद्यपु॰तिथौ॥चतुर्थिकर्मागभूतेअस्मिन्स्थंडिलेपंचभूःसंस्कारपूर्वकंअग्निप्रति
ष्ठापनंकरिष्ये॥त्रिभिर्दर्भैःपरिसमुह्य॥गो॰अं॰यउ॰हूंफट्इतिमंत्रेणकुश्याज्य॥अग्निमुप
समाधाय॥अथाग्नेर्ध्यानं॥अग्निमूर्द्धेतिवि॰ग॰॥ॐअग्निमूर्द्धा॰॥इतिचतुर्थिकर्मणि
विवाहाग्निस्थापनंयोजकनामानं॥अग्नेर्दक्षिणतोब्रह्मासनमास्तीर्यअत्रब्रह्मोपवेशनं॥
अस्मिन्चतुर्थिकर्मणित्वंब्रह्माभव॥भवामीतितेनवाच्यतां॥उत्तरतःप्राणायामत्रयं॥अ
थैवोत्तरतस्रुवपात्रेप्रतिष्ठाप्य॥परिस्तरणचरुश्रपणाद्याज्यभागांतेकृत्वाअग्निनाशननिमि
त्तेअनादिष्टप्रायश्चित्तहोमेविनियोगः॥ॐभूःस्वाहाइदमग्नयेनमम॥१॥ॐभुवःस्वाहा॰॥२॥
ॐस्वःस्वाहा॰॥३॥ॐभूर्भुवःस्वःस्वाहा॥इदंप्रजापतयेनमः॥४॥ॐत्वन्नोऽअग्ने॥५॥ॐ
सत्वन्नो॰॥६॥ॐअयाश्चाग्ने॰॥७॥ॐयेतेशतं॥८॥ॐउदुत्तमं॥९॥इतिअनादिष्टप्रा
यश्चीतहोमं॥नंतरआज्येनपंचाहुतयोवक्ष्यमाणैःमंत्रैः॥ॐअग्नेप्रायश्चितेत्वंदेवानां ६८
प्रायश्चितिरसिब्राह्मणस्त्वानाथकामउपदधामियास्येपतिघ्नीतस्तनूस्तामस्यैनाशय
स्वाहा॥इदंवायवेनमम॥२॥ॐसूर्यप्रायश्चित्तेत्वंदेवानांप्रायश्चितिरसिब्राह्मणस्त्वा

नाथकामउपदधामियास्यैपतिघ्नीस्तनूस्तामस्यैनाशयस्वाहा॥इदंसूर्यायनमम॥३॥
ॐचंद्रप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तेत्वंदेवानांप्रायश्चितिरसिब्राह्मणस्त्वानाथकामउ
पदधामियास्येगृहघ्नीत॥तनूस्तामस्यैनाशयस्वाहा॥इदंचंद्रमसेनमम॥४॥ॐ
गंधर्वप्रायश्चित्तेत्वंदेवानांप्रायश्चितिरसिब्राह्मणस्त्वानाथकामउपदधामियास्येयशो
घ्नीतनूस्तामस्यैनाशयस्वाहा॥इदंगंधर्वायनमम॥तत्रभ्रमभिघार्य॥ततस्थालिपाकेन॥
ॐप्रजापतयेस्वाहा॥इदंप्रजापतयेनमम॥ ॥अग्नेप्रायश्चित्यादिप्रजापतेतानांघरुक्षु
तीनांमुदपात्रेसंस्रवत्यागः॥अंन्यासमातीनांप्रायश्चियात्रांतरेसंस्रवत्यागः॥ततःस्थ
लीपाकेन॥ॐअग्नयेस्विष्टकृतयेस्वाहा॥इदमग्नयेस्विष्टकृतयेनमम॥१॥ततोमाहाव्या
ह्यत्यादिप्रजापत्यंताआज्येनवाहुतयः॥ततःपात्रांतरेसंस्रवस्तेषांप्राशनं॥संस्रवप्राश
नं॥पवित्राभ्यांमार्जनं॥अग्नेःपवित्रप्रतिपत्तिः॥ब्रह्मणेपूर्णपात्रदानं॥कृतस्यचतुर्थिक
र्मणःसांगतासिध्यर्थंब्रह्मणेइदंपूर्णपात्रदानंतुभ्यमहंसंप्रददे॥प्रतिगृह्यतोम्प्रतिगृ॰॥
अग्नेःपश्चिमभागेप्रणीतामोक्षः॥आपःशिवाःम्॥१॥ततोवस्त्रेदपात्रादुदकमादायए
नांवधूमूद्वाभिषिंचति॥ॐयातेपतिघ्नीप्रजापतिघ्नीपशुपतिघ्नीयशोघ्नीनिर्दितानूर्जी
रघ्नीतनएनांकरोमिसाजीर्यत्वंमयासह॥असावितिनामगृह्णाति॥असोस्थानेनाम

देश॥ ॥अमुकीत्यनेन मंत्रेण॥अथैनांवधूस्थाःक्षीपाकंकुनशेषंसकुमाराश्रयंतिवरः॥
ॐप्राणेस्तेप्राणान्त्सदधाम्यस्थिभिरस्थीनिमांसैर्मांसानित्वचात्वचमिति॥१॥अ
नेनवरस्यैवमंत्रपाठः॥आचम्य॥अथशिलाचारंकुर्यात्॥वधुवरयोःहस्तेकर्णंत्यक्त्वा
तूष्णीमेव॥वसोःपवित्रमसिइतिमंत्रेणशिलाचारंकुर्यात्॥कृतस्यचतुर्थिकर्माख्यस्य
कर्मणःसांगतासिध्यर्थंयथाशक्त्याब्राह्मणान्भोजयिष्ये॥नानानाम॰भूय॰त्॥ततोऽअ
ग्निविसर्जनं॥गछगछ॰ना॥१॥इतिचतुर्थिकर्म॥ ॥अथदेवकोत्थापनं॥ ॥त
दाहविघ्नकर्मा॥समेतुदिवसेकुर्यात्देवकोत्थापनंबुधः॥षष्ठंचविषमंनेष्टमुत्थापंचसप्त
माहविनिा॥१॥समेषुशुद्धंविषमेषुपंचमसप्तयातिरिक्तंदिननेष्टमित्यर्थः॥अथदेवकोत्था
पनमंउपोद्घातसनयोःतंत्रेणप्रयोगः॥स्थापितदेवताःपंचोपचारैःसभर्तृकंत्रदेशांतर
समानीयपत्नीसंस्कार्याभ्यांसमन्वितोयजमानःप्राङ्मुखउपवेश्याचम्यप्राणानायम्य॥ममसु
खश्रेयादिका॰देशका॰शुभषुण्यतिथौ॥ममात्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंम ८६
मगृहेषड्षड्मासेसुशोभनप्राप्त्यर्थंस्थापितदेवतानांउत्थापितदेवतानांउत्थापनमंउ
पोद्घातसनाख्यकर्मकरिष्ये॥हेहेरंव॥गणानात्वेतिमंत्रेणमहागणपतयेनमः॥षोडशोपचारैः

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

पूजयेत्॥ततोयथाविधिगणेशमभ्यर्चकलशंविधिनासंस्थाप्यस्वस्तिवाचनंयथोक्तं॥भो
ब्राह्मणाः॥मयाक्रियमाणयोःममगृहदेवकोत्थापनमंउपोद्घातसनाख्ययोःकर्मणोपुण्याहंभ
वंतोब्रुवंतु॥एवंसर्वत्र॥सुवासिनीभिर्निराजनंकार्यं॥अनाधृष्टइतिमंत्रेण॥अस्यपुण्याहवा
चनस्ययोयोविधिःसएवउपविष्टब्राह्मणानांवचनात्महागणपतिप्रसादतःसर्वंपरिपूर्णंतास्तु
अस्तुपरिपूर्णंता॥अद्यपूर्वोच्चा॥तिथौ॥अविघ्नेदित्यादिमंउपमातृकास्थापितदेवतानांउत्था
पूजनंकरिष्ये॥स्थापितदेवताभ्योनमः॥पंचोपचारैःपूजयेत्॥उत्तिष्ठब्रह्मणस्पतेइतिमंत्रेण
विसर्जनं॥उत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे॥उपप्रयंतुमरुतःसुदानवइंद्रप्राशूर्भवासचा॥१॥
ततस्तानिभूर्यस्थानिवृक्षपत्रवेष्टितानिउन्मुक्तसूत्राणिकृत्वा॥ततस्तस्मिन्भूर्यंहरिद्राकुं
कुमानिक्षिप्त्वा॥जलधारायांतयित्वा॥द्यौःशांतिरितिमंत्रेण॥ॐद्यौःशांतिरंतरि॥१॥वसोः
पवित्रंक्षुः॥इत्येवंत्रिवारंकृत्वा॥ततस्थानिवृक्षपत्राणिगृहोपरिक्षुचौदेशेप्रक्षिप्यागत्य
मंडपंवितानंईशानंकोणादिमुच्यमेततोयजमानःब्राह्मणानुप्रब्रूयात्॥आचार्ययज
मानहस्तद्वयेपूगीफलानिदद्यात्॥भोब्राह्मणाःअस्मिन्गृहेषड्षड्मासेसुशोभनमस्ति
तिभवंतोब्रुवंतु॥ओम्॥अस्तुशोभनम्॥इतितेषांप्रतिवचनं॥एवंत्रिवारंकृत्वा॥क

त्वा॥ कृतस्यदेवकोस्थापनाख्यस्यकर्मणःसांगतासिध्यर्थंयथाशक्त्याब्राह्मणान्भोजयि
ष्ये॥ नानानामगोत्रेभ्योब्राह्मणेभ्योभूयसीदक्षिणाहस्येतेनश्रीकर्मांगदेवताःप्रियंतां॥ तृप्ता
ननेनपतिविसर्जनं॥ यांतुदेवेत्यादि॥ इतिदेवकोत्थापने॥ ॥इतिऋषिभट्टिवोक्त
कोष्ठेमासिमगमनं॥ ॥शुभंभवतु॥ ॥श्रीजगंदंबार्पणमस्तु॥ ७१॥ ७१॥
शकेषष्ठ्यधिकशतसंवत्सरेकार्तिकेमासेशुक्लपक्षेपौर्णिमास्यांतिथौइंदुवासस
रेइदंपुस्तकंतर्फरनागिरीतस्थानेग्रामकामारवेलिकंकेकरोपकनामस्यात्थं
द्विराजात्मजनारायणेनलिखितं॥ ॥ ॥श्रीरस्तु॥ छ॥ ७१॥ ७१॥

DR. BHAU DAJI